International Journal of Sanskrit Research 2024; 10(3): 286-292

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(3): 286-292
© 2024 IJSR
www.anantaajournal.com
Received: 01-02-2024
Accepted: 05-03-2024

**Bidyut Kr. Barman**
Department of Sanskrit,
Raiganj University,
Raiganj, West Bengal, India

**Corresponding Author:**
**Bidyut Kr. Barman**
Department of Sanskrit,
Raiganj University,
Raiganj, West Bengal, India

# पाणिनि-कातन्त्रव्याकरणयोः कारकप्रकरणयोः तुलनात्मकम् अध्ययनम्

**Bidyut Kr. Barman**

**DOI:** https://doi.org/10.22271/23947519.2024.v10.i3e.2402

**प्रस्तावना**

आचार्य शर्ववर्मा तस्य कातन्त्रव्याकरणस्य नामप्रकरणस्य कारकपादस्य सर्वादौ अपादानकारकस्य प्रयोगं कृतवान्। अपादानकारक विषये कातन्त्रकारेण उक्तम्- यस्मात् विभागः विच्छेदः वा, भयं तथा ग्रहणं बोध्यते तस्य अपादानसंज्ञा भवति। यथा-वृक्षात् पत्रं पतति, व्याघ्राद् विभेति, चौराद् उद्विजते, उपाध्यायादधीते। कातन्त्रव्याकरणस्य सूत्रं भवति "यतोऽपैति भयमादत्ते तदपादानम्" [1] पानिणीयव्याकरणेऽपि अपादानकारके पञ्चमीविभक्तिः भवति इति। पानिणीयव्याकरणे "ध्रुवमपायेऽपादानम्"[2] इति सूत्रेण अपादानसंज्ञा, तथा "अपादाने पञ्चमी"[3] इत्यनेन पञ्चमीविभक्ति। 'अपाय' इति पदस्यार्थं भवति विच्छेद विश्लेष वा। अपायावस्थायामेव यः ध्रुवः तस्य अपादान संज्ञा भवति। तद्यथा- वृक्षात् पत्राणि पतन्ति।

अत्र वक्तुं शक्यते यत् आचार्यपाणिनिना अपादानसंज्ञाविधानार्थं वहुनि सूत्राणि प्रयुज्यन्ते। ते भवन्ति- "ध्रुवमपायेऽपादानम्"[4], "भीत्रार्थानां भयहेतु"[5],"पराजेरसोढः"[6], "वारणार्थानामीप्सितः"[7],

---

[1]. का. व्या. 2/4/8

[2]. अष्टा. 2/4/24

[3].अष्टा. 2/3/28

[4]. अष्टा. 1/4/24

[5]. अष्टा. 1/4/25

[6]. अष्टा. 1/4/26

[7]. अष्टा. 1/4/27

"अन्तर्द्धौ येनादर्शनमिच्छति"[8], "आख्यातोपयोगे"[9], "जनि कर्तुः प्रकृतिः" [10], "भुवः प्रभवः" [11]। किन्तु आचार्य शर्ववर्मणा अपादानसंज्ञाविधानार्थं केवलं सूत्रद्वयं प्रवर्तितम्। तद्यथा- "यतोऽपैति भयमादत्ते वा तदपादानम्" [12], "ईप्सितम च रक्षार्थानाम्"[13]। श्रुयते यत् महाभाष्यकारः पतञ्जलि प्रथमं सूत्रं विहाय अवशिष्टं सूत्रं प्रपञ्चार्थं स्वीकरोति स्म। अपायः इति पदं वाह्यः अपि च वौद्ध इति रूपेण स्वीक्रियते। अन्यस्मिन् सूत्रम् अनावश्यकम् इति जायते। कातन्त्रव्याकरणस्य व्याख्याकारोऽपि इदमभिमतं स्वीकरोति।

अपादानकारकस्य त्रय एव भेदाः प्राप्यन्ते। तद्यथा-

1. निर्दिष्ट विषयः- ग्रामाद् आगच्छति।
2. उपात्त विषयः- मेघात् विद्योतते विद्युत्।
3. उपेक्षितक्रिया- पाटलिपुत्रकेभ्यः आढ्यतराः।

पूर्वाचार्यानां मतानुसारे नाट्यशास्त्रेऽपि अस्य उल्लेखःप्राप्यते। तद्यथा-

तत् प्राहुः सप्तविधं पदकारकसंयुतं प्रथितसाध्यम्।
निरिदेशः सम्प्रदानापादानप्रभृतिसंज्ञाभिः।।[14]

चान्द्रादि अपानिणीयव्याकरणेऽपि एतदर्थं प्राप्यते। यथा-

चान्द्रव्याकरणे- "अवधेः पञ्चमी"[15]।
जैनेन्द्रव्याकरणे- "ध्यपाये ध्रुवमपादानम्"।[16]
हैमव्याकरणे- "अपायेऽवधिरपादानम्"।[17]

मुग्धवोधव्याकरणे-
"यतोऽपायभीजुगुप्सापराजयप्रमादादानभुत्राणाविरामान्तर्द्धिवारणं जंपी"।[18] (सू 299)

अग्निपुराणे- अपादानं यतोऽपैति आदत्ते च भयं तथा। अपादाने पञ्चमी स्यात्। अपादानं द्विधा प्रोक्तम्[19]।(350/27,353/11)
नारदपुराणे- पञ्चमी स्यात् ङसिभ्यांभ्यो ह्यपादाने च कारके।
यतोऽपैति समादत्ते अपदत्ते च यं यतः।।
.................... रक्षार्थानां प्रयोगतः।
ईप्सितं चानीप्सितं यत् तदपादानकं स्मृतम्[20]।।(52/7,9)

आचार्यपाणिनिना तस्य व्याकरणे अपादानसंज्ञा विधानार्थं "भीत्रार्थानां भयहेतु", "वारनार्थानामीप्सितः" सूत्रद्वयं प्रवर्तितम्। किन्तु शर्ववर्मणा तस्य कातन्त्रव्याकरणे केवलम् 'इप्सितं च रक्षणार्थम्' सूत्रस्य प्रयोगं कृतम्। अतः उभयत्र उदाहरणस्य भिन्नता दृश्यते। पानिणीयव्याकरणस्योदाहरणं भवति यथा- चौरेभ्यो रक्षति, यवेभ्यो गां वार्यते। अपरस्यां दिशि कातन्त्रव्याकरणस्य दाहरणं भवति यथा- यवेभ्यो गां रक्षति, अहिभ्यः आत्मानं रक्षति, कुपाद् अन्धं वारयति, शालिभ्यः शुकान् वारयति।

पानिणीयव्याकरणे तथा कातन्त्रव्याकरणे उभयत्र सम्प्रदानसंज्ञा दृश्यते। आचार्य पाणिनिना सम्प्रदानसंज्ञा विधानार्थं वहुनि सूत्राणि प्रयुज्यन्ते। तद्यथा- "कर्मणा यमभिप्रैति स सम्प्रदानम्" [21], "रुच्यर्थानां प्रीयमाणः" [22], "श्लाघह्नुस्थासपां ज्ञीप्समानः" [23],

8. अष्टा. 1/4/28
9. अष्टा. 1/4/29
10. अष्टा. 1/4/30
11. अष्टा. 1/4/31
12. का. व्या. 2/4/8
13. का. व्या. 1/4/9
14. ना. शा. 14/23, (कातन्त्रव्याकरणे, पृष्ठा-40)
15. चा. व्या. 2/1/81, (कातन्त्रव्याकरणे, पृष्ठा-40)
16. जै. व्या. 1/2/110, (कातन्त्रव्याकरणे, पृष्ठा-40)
17. है. व्या. 2/2/29, (कातन्त्रव्याकरणे, पृष्ठा-40)
18. मु. व्या. सूत्र. 299, ( पृष्ठा-207)
19. अ. पु. 350/27,353/11, (कातन्त्रव्याकरणे, पृष्ठा-40)
20. ना. पु. 52/7,9, (कातन्त्रव्याकरणे, पृष्ठा-40)
21. अष्टा. 1/4/32
22. अष्टा. 1/4/33
23. अष्टा. 1/4/34

"धारेरुत्तमर्णः"[24], "स्पृहेरीप्सितः"[25], "क्रुधद्रुहेर्ष्यासूयार्थनां यं प्रति कोपः"[26], "राधीक्ष्योर्यस्य विप्रश्नः"[27], "प्रत्याङ्भ्यां श्रवः पूर्वस्य कर्ता"[28], "अनुप्रतिगृणश्च"[29]। एतेषां सूत्राणां प्रयोगं कृत्वा स्वविस्तरं स्वरूपम् उपस्थापयति। अपरस्यां दिशि कातन्त्रकारेण सम्प्रदानसंज्ञायाः विधानार्थम् एकमेव सूत्रं विधीयते। तद्यथा- "यस्मै दित्सा रोचते धारयते वा तत् सम्प्रदानम्"[30]। सूत्रार्थं भवति यस्मै दातुमिच्छा, यस्मै रोचते, यस्मै धारयते वा तत् कारकं सम्प्रदानसंज्ञं भवति। अर्थात् कातन्त्रकारेण शेषार्थं वलपूर्वकं व्याख्यां क्रियते।यथा- ब्राह्मणाय गां ददाति, देवदत्ताय रोचते मोदकः, यज्ञदत्ताय स्वदते, विष्णुमित्राय गां धारयते, कथं छात्राय श्लाघते इत्यादि। पानिणीव्याकरणस्य सम्प्रदानविषयस्य यः आदिमं सूत्रं सः लोकव्यवहारप्रसिद्धः इति। अवशिष्टं सूत्रं शास्त्रीयसम्प्रदानम् इति मन्यन्ते।

सम्प्रदानस्य त्रयः एव भेदः। तद्यथा-

अनिराकरणम्- सूर्यायार्घ्यं ददाति।

प्ररणा- विप्राय गां ददाति।

अनुमतिम्- उपाध्यायाय गां ददाति।

नाट्यशास्त्रोऽपि सम्प्रदानम् इति विषये उक्तम् यत्- "निर्देशः सम्प्रदानापादानप्रभृतिसंज्ञाभिः"[31]।अनेन कथनेन अस्य प्राचीनता तथा प्रामानिकता सिद्धं भवति।

अर्वाचीनाचार्याः अस्याः संज्ञायाः प्रयोगं कृतवन्तः। तद्यथा-

जैनेन्द्रव्याकरणे- "कर्मणोपेयः सम्प्रदानम्, धारेरूत्तमर्णः, परिक्रयणम्"[32]।

शाकटायनव्याकरणे- "कर्मणोऽभिप्रेयः सम्प्रदानम्"[33]।

हैमव्याकरणे- "कर्माभिप्रेयः सम्प्रदानम्"[34]।

मुग्धवोधव्याकरणे- "यस्मै दित्सासूयाक्रोधेर्ष्यारुचिद्रोहस्थाह्नुङ्स्पृहिशपाधिक्षा प्रतिश्रुप्रत्यनुगृधार्यर्था भं ची तादर्थ्ये च"[35]।

अग्निपुराणे- "सम्प्रदाने चतुर्थ्यपि, यस्मै दितसा धारयते सम्प्रदानं तदीरितम्। सम्प्रदानं त्रिधा प्रोक्तम्"[36]।

## अधिकरण

आधारस्य अधिकरणसंज्ञाम् उभौ शाब्दिकाचार्यौ स्वीकृतचवन्तौ । आधारस्य अधिकरणसंज्ञा इति बिषये पाणिनीयव्याकरणस्य सूत्रं भबति- "आधारोऽधिकरणम्"[37]। यत्र क्रिया तिष्ठति सः एव आधारोच्चते इति व्याख्याकाराः तेषां मतम् उपस्थापयन्ति। क्रिया कुत्रापि कर्त्रा सह कुत्रापि कर्मणा सह साक्षात् सम्बन्धेन तिष्ठति। अतः कर्तृ-कर्मसंज्ञया येन अधिकरकणस्य बाधा न भवेत्, एतदर्थं व्याख्याकाराणां मतं यत् येन आधारेण कर्ता कर्म च प्रत्यक्ष्यसम्बन्धेन समर्थितः भविष्यति सैव आधारः मन्यन्ते। अपि च आधारस्य अधिकरणसंज्ञा प्रयोज्या भविष्यति। अधिकरणसंज्ञा इति बिषये कातन्त्रव्याकरणस्य सूत्रं भवति- "य आधारस्तदधिकरणम्"[38]। सामान्यतया त्रयः एव आधारः। तद्यथा-

[24]. अष्टा. 1/4/35

[25]. अष्टा. 1/4/36

[26]. अष्टा. 1/4/37

[27]. अष्टा. 1/4/39

[28]. अष्टा. 1/4/40

[29]. अष्टा. 1/4/41

[30]. का. व्या. 2/4/10

[31]. ना. शा. 14/23, (कातन्त्रव्याकरणे, पृष्ठा-56)

[32]. जै. व्या. 1/2/111-13, (कातन्त्रव्याकरणे, पृष्ठा-56)

[33]. शा व्या. 2/2/25, (कातन्त्रव्याकरणे, पृष्ठा-56)

[34]. है. व्या. 1/2/123, (कातन्त्रव्याकरणे, पृष्ठा-57)

[35]. मु. व्या. सूत्र-294, (पृष्ठा-167)

[36]. अ. पु. 350/26,353/9, (कातन्त्रव्याकरणे, पृष्ठा-56)

[37]. अष्टा. 1/4/45

[38]. का. व्या. 2/4/11

औपश्लेषिकः आधारः- कटे आस्ते।

अभिव्यापकः आधारः- तिलेषु तैलम्, दिवि देवा।

वैषयिकः आधारः- गङ्गायां घोषः, अङ्गुल्यग्र करिशतम्।

आचार्यः दुर्गासिंहः तस्य टीकायाः आधारश्चतुर्विधम् इति उक्तम्। तद्यथा- "औपश्लेषिकः, अभिव्यापकः, वैषयिकः, समीपकश्चेति"[39] किन्तु एतेषाम् अतिरिक्तं व्याख्याकारैः समीपस्थम्, औपचारिकमौपचारिकश्चेति आधारमपि स्वीकुर्बन्ति। एतेषाम् उदाहरणानि एकमेव श्लोकेन प्राप्यन्ते। तद्यथा-

"कटे शेते कुमारोऽसौ वटे गावः सुशेरते।
तिलेषु बिद्यते तैलं हृदि ब्राह्मामृतं परम्।।
युद्धे संनह्यते धीरोऽङ्गुल्यग्रे करिणां शतम्"[40]।।

अत्र ज्ञातव्यम् यत् पाणिनीयव्याकरणस्य व्याख्याकाराः प्रायशः अभिव्यापकस्य आधारस्य कातन्त्रस्य व्याख्याकाराः "दिवि देवाः" उदाहरणम् समीचीनमिति मन्यन्ते। कश्चनाः भाष्यकाराः अयमुदाहरणं वैषयिकस्य आधारस्य उदाहरणमपि मन्यन्ते। अधिकरणसंज्ञा बिषये अर्वाचीनाणां शाब्दिकाचार्याणां मतोऽपि प्राप्यन्ते। तद्यथा-

जैनेन्द्रव्याकरणे- "आधीरोऽधिकरणम्"[41]

हैमशब्दानुशासणे- "क्रियाश्रयस्याधारोऽधिकरणम्"[42]

मुग्धवोधव्याकरणे- "कालभावाधारं ङं ष्मी"[43]

अग्निपुराणे- "आधारो योऽधिकरणं बिभक्तिस्तत्र सप्तमी"[44]

नारदपुराणे- "ङ्योस्सुपः सप्तमी तु स्यात् सा चाधिकरणे भवेत्, आधारे चापि"[45]

क्रियासिद्धार्थं यः अत्यन्तं सहायकं तस्य करणसंज्ञा उभौ शाब्दिकाचार्यौ स्वीकृतवन्तौ। पाणिनीयव्याकरणस्य सूत्रं भवति "साधकतमं करणम्"[46]। अपरस्यां दिशि कातन्त्रव्याकरणस्य सूत्रं भवति "येन क्रियते तत् करणम्"[47]।वाह्यः आभ्यन्तरश्च भेदेन करणं द्विधा विभज्यते। उदाहरणं यथा

वाह्यः-दात्रेण धान्यं लुनाति।

आभ्यन्तरः- मनसा मेरू गच्छति।

"निर्देशः सम्प्रदानापादानप्रभृतिसंज्ञाभः"[48] अस्मिन् नाट्यशास्त्रीय वचने 'प्रभृति' इति शब्देन 'करण' अस्य उपादानार्थं प्राचीनता तथा प्रामाणिकता सिद्धं भवति। अर्वाचीनव्याकरणेऽपि अयं संज्ञा उपलब्धं भवति। तद्यथा-

जैनेन्द्रव्याकरणे- "साधकतमं करणम्"[49]

हैमशब्दानुशासणे- "साधकतमं करणम्"[50]

मुग्धवोधव्याकरणे- "साधनहेतुविशेषणभेदकं घं कतघिस्त्री"[51]

अग्निपुराणे- "क्रियते येन करणम्। अनुक्ते तिङ्कृत्त द्धितैस्तृतीया करणे भवेत्"[52]

नारदपुराणे- "येन क्रियते तेत करणम्"[53]

---

[39]. दु. टी. (कातन्त्रव्याकरणे,पृष्ठा-. 57)

[40]. का. व्या. ( पृष्ठा-. 64)

[41]. जै. व्या. 1/2/116, (कातन्त्रव्याकरणे, पृष्ठा-65)

[42]. है. श. 2/2/30, (कातन्त्रव्याकरणे, पृष्ठा-65)

[43]. मु. व्या. सू. 309,(पृष्ठा-228)

[44]. अ. पु. 350/28, (कातन्त्रव्याकरणे, पृष्ठा-65)

[45]. ना. पु. 52/8-9, (कातन्त्रव्याकरणे, पृष्ठा-65)

[46]. अष्टा. 1/4/42

[47]. का व्या. 2/4/12

[48]. ना. शा. 14/23, (कातन्त्रव्याकरणे, पृष्ठा-70)

[49]. जै. व्या. 1/2/114, (कातन्त्रव्याकरणे, पृष्ठा-70)

[50]. है. श. 2/2/24, (कातन्त्रव्याकरणे, पृष्ठा-70)

[51]. मु. व्या. सू. 288, (पृष्ठा-190)

[52]. अ. पु. 350/25, (कातन्त्रव्याकरणे, पृष्ठा-70)

[53]. ना. पु. 52/5, (कातन्त्रव्याकरणे, पृष्ठा-70)

क्रियाजन्यफलशालित्वं कर्मत्वम्। अर्थात् कर्ता विहितक्रियया जातं फलाश्रयं भवति कर्म। कातन्त्रकारः "येन क्रियते त्त कर्म"[54] इति अनेन एकेनैव सूत्रेण अयमर्थं स्पष्टं कृतम्। अपरस्यां दिशि आचार्यः पाणिनिः कर्मसंज्ञाविधानाय सूत्रपञ्चकं प्रयोगं कृतवान्। तद्यथा- "कर्तुरीप्सिततमं कर्म"[55], "तथायुक्तं चानीप्सितम्"[56], "अकथितं च"[57] "गतिवुद्धिप्रत्यवसानार्थशव्दकर्माकर्मकाणामणि कर्ता स णौ"[58], "अधिशीङ्स्थासां कर्म"[59]

सामेनेयतया करेमसेय तिस्रैव भेदः प्रप्यते। तद्यथा- निर्वर्त्यम्, विकार्यम्, प्राप्यञ्च।

निर्वर्तते निष्पद्यते यत् तत् निर्वर्तम्। अस्य लक्षणं भवत- 'प्रकृतिभुतपदासमभिव्यहृतपदोपस्थाप्यते सति क्रियाजन्योत्पत्तिरूपफलत्वं निर्वर्तम्'। यथा- कटं करोति। अथ विक्रयते यत् तत् विकार्यम्। अर्थात् यः विकृतिलाभं करोति सः विकार्यकर्म् भवति।यथा- काष्ठं भष्मं करोति, ओदनं पचति, सुवर्णं कुण्डलं करोति। विकार्यकर्मस्य लक्षणं भवति- 'प्रतियमानविकृतिभावत्वे सति क्रियाजन्योत्पत्तिरूपफलत्वं विकार्यत्वम्'। तदनन्तरं यत्र तु निर्वर्तविकार्यसम्बन्धिनो विशेषाः पूर्वोक्ताः प्रत्यक्षेणानुमानेन वा कुत्रापि न प्रतीयन्ते केवलं प्राप्तिमात्रमेव प्रतीयते तत् प्राप्यं कर्म। अर्थात् निर्वर्तात् तथा विकार्यात् भिन्नं एव क्रियाजन्य फलाश्रयो भवति प्राप्यकर्म- निर्वर्तविकार्यभिन्नत्वे सति क्रियाजन्यफलशालित्वं प्राप्यत्वम्। तद्यथा- आदित्वं पश्यति।

वैयाकरणाः अस्य सप्त भेदाः स्वीकुर्वन्ति। यथा- निर्वर्तम्- कटं करोति।विकार्यम्- ओदनं पचति। प्राप्यम्- आदित्वं पश्यति।उदासीनम्- ग्रामं गच्छन् बृक्षमूलान्युपसर्पति। अनीप्सितम्- अहिं लङ्घयति।संज्ञान्तरानाम् आख्यातम्- गां दोग्धि पयः।अन्यपूर्वञ्च- ग्राममधिशेते इति।

पूर्वाचार्येण कर्मसंज्ञा प्रयुज्यते यत्- "निर्देशः सम्प्रदानापादानप्रभृतिसंज्ञाभः"[60]

अर्वाचीनाचार्येण कर्मसंज्ञा प्रयुज्यते यत्-

चान्द्रव्याकरणे- "क्रियाप्ये द्वितीया"[61]।

जैनेन्द्रव्याकरणे- "दिवः कर्म, कर्मैवाधिशीङ्स्थासः"[62]।

हैमशब्दानुशासणे- "कर्तुर्व्यप्यं कर्म"[63]।

मुग्धवोधव्याकरणे-

"कर्मक्रियाविशेषणाभ्निवेशाधिशीङ्स्थासन्वध्युपवास ड ढं द्वि, देशाध्वकालभावं वाढैः"[64]।

कातन्त्रव्याकरणँ अपि च पानिणीयव्याकरणे कर्तृसंज्ञाविषयक- परिभाषा प्रायः समानमस्ति।कर्तृसंज्ञाविधायकस्य पानिणीयव्याकरणस्य सूत्रं भवति "स्वतन्त्र कर्ता"[65] अपरस्मिन् दिशि कातन्त्रव्याकरणस्य सूत्रं भवति "यः करोति य कर्ता"[66]। स्वतन्त्रम् इति पदस्यार्थं भवति प्रधानभुतम्। अयमर्थं कातन्त्रव्याख्याकाराः कलापचन्द्रकाराः सुषेणविद्याभुषणाश्च स्वीकृयते। करोतीति आख्यातप्रत्ययेन स्वतन्त्र उच्चते, शब्दानां नित्यत्वान्येतरेतराश्रयदोषः। क्रियायां यः स्वतन्त्रः स कर्तेत्यर्थः। अस्याः अनेकलक्षणानि व्याख्याकारैः स्वीकुर्वन्ति। तद्यथा- क्रियाश्रयत्वं कर्तृत्वम्। प्राधान्येन धातुवाच्यव्यापारत्वं कर्तृत्वम्, अयं स्वतन्त्रकर्ता अभिहित अनभिहित तथा कर्म कर्ता इति भेदेन तिस्रो भवति। अत्र अभिहितकर्तुः उदाहरणं भवति- देवदत्तः

[54]. का. व्या. 2/4/13

[55]. अष्टा. 1/4/49

[56]. अष्टा. 1/4/50

[57]. अष्टा. 1/4/51

[58]. अष्टा. 1/4/52

[59]. अष्टा. 1/4/46

[60]. ना. शा. 14/23, (कातन्त्रव्याकरणे, पृष्ठा-98)

[61]. चा. व्या. 2/1/43, (कातन्त्रव्याकरणे, पृष्ठा-99)

[62]. जै व्या. 3/2/115,17-23, (कातन्त्रव्याकरणे, पृष्ठा-99)

[63]. है. श. 2/2/3, (कातन्त्रव्याकरणे, पृष्ठा-99)

[64]. मु. व्या. सूत्र- 281-82, ( पृष्ठा-171, 174)

[65]. अष्टा. 1/4/54

[66]. का. व्या. 2/4/14

पचति। अनभिहितकर्तुः उदाहरणं भवति- देवदत्तेन पच्यते। अपि च कर्मकर्त्रोः उदाहरणं भवति- पच्यते ओदनः स्वयमेव। नामभेदेनापि तिस्र एव स्वीक्रियन्ते वैयाकरणाः।

अर्वाचीनाचार्येण कर्तुः प्रयोगः यथा क्रियते-

जैनेन्द्रव्याकरणे- "स्वतन्त्रः कर्ता"[67]।

हैमशब्दानुशासणे- "स्वतन्त्रः कर्ता"[68]।

मुग्धवोधव्याकरणे- "साधनहेतुविशेषणभेदकं धं कर्ता घस्त्री"[69]।

अग्निपुरेणे- "कर्ता यस्य करोति स। संबोधने च प्रथमा उक्ते कर्मणि कर्तरि। कर्ता पञ्चविधः प्रोक्तः"[70]।

प्रयोजकस्य हेतुसंज्ञा अपि च कर्तृसंज्ञा उभौ व्याकरणकारौ स्वीकृतः। पानिणीयव्याकरणस्य सूत्रं भवति "तत्प्रयोजको हेतुश्च" [71]। अपरस्मिन् दिशिकातन्त्रव्याकरणस्य सूत्रं भवति "कारयति यः स हेतुश्च"[72]। अत्र हेतुः त्रिधा मन्यन्ते वैयाकरणाः। यथा-

"प्रेषणाध्येषणे कुर्वंस्तत्समर्थानि वाचरन्।
कर्तैव विहितः शास्त्रे हेतुसंज्ञं प्रपद्यते"[73]

अर्थात् त्रिधा हेतुः भवति यथा- प्रेषणकारकः- राजा भृत्यं कटं कारयति। अध्येषणकारकः- यज्ञदत्तो गुरूणा शिष्यं पावयति। समर्थाचरणः- भिक्षा भिक्षुकं वासयति।

हेतु अपि च कारणस्य भेददर्शनार्थं भट्टोजिदीक्षितेन "हेतौ"[74] इत्यनेन सूत्रेण उक्तं यत्- "द्रव्यादि साधारणं निर्व्यापारसाधारणंच हेतुत्वम्। कारणत्वं च क्रियामात्राविषयंव्यापारनियतं च"[75]। अर्थात् यः द्रव्यः, गुण क्रियाश्च त्रयानामुत्पन्नं करोति अपि च यत्र व्यापारस्थातुं शक्नोति, न वा तिष्ठति सैव हेतोरूच्यते। किन्तु कारणं सैवोच्यते यत्र केवलं क्रिया जायते, एवं व्यापारः अवश्यमेव तिष्ठति। हेतोरूदाहरणं यथा- दण्डेण घटः, धनेन कुलम्, कन्यया शोकः, विद्ययाः यशः इत्यादि। अपरस्यां दिशि करणस्य उदाहरणं भवति- रामेण बाणेन हतो बालि।

संस्कृतव्याकरणस्य कारकप्रकरणं द्विविधिं प्रयोगं दृश्यते। प्रथमं प्रयोगम्-

अपादान-सम्प्रदान-करणाधारकर्मणाम्।
कर्तृश्चान्योऽन्यसंदेहे परमेकं प्रवर्तते।।

अर्थात् अपादान, सम्प्रदान, करण, अधिकरण, कर्म कर्ताश्च। द्वितीयप्रकाकं भवति-

कर्तृ-कर्माधिकरणं करणं सम्प्रदानकम्।
अपादानं च संदेहे परं पूर्वेण बाध्यते।।

अर्थात् कर्तृ, कर्म, अधिकरण, करण, सम्प्रदान अपादानश्च। अत्र एकस्मनेव स्थाने प्रकारद्वयं कारकं प्राप्यते। तत्र प्रथमक्रमानुसारेण परवर्तीकारकः प्रवृत्तः भवति अपि च द्वितीय क्रमानुसारेण पूर्ववर्ती कारकः।

पाणिनिना शर्ववर्मणा च प्रथमः क्रमः स्वीकृयाते। किन्तु शर्ववर्मा तस्य कातन्त्रव्याकरणे करण कारकं अधिकरणकारकात् अनन्तरं स्थापितवान्। यस्य फलस्वरूपः- 'धनुषा शरान् क्षिप्यति' इत्यस्मिन् उदाहरणे धनुष इति पदस्य करणसंज्ञा एव उपपन्नं भवति तथा अधिकरणसंज्ञायाः वाधः जायते। अपरस्मिन् दिशि पानिनेः मतानुसारं अधिकरणसंज्ञायाःप्राप्तिर्भवति इति। तद्यथा-

---

[67]. जै. व्या. 1/2/125, (कातन्त्रव्याकरणे, पृष्ठा-106)

[68]. है. श. 2/2/2, (कातन्त्रव्याकरणे, पृष्ठा-106)

[69]. मु. व्या. सूत्र- 288, (पृष्ठा-190)

[70]. अ. पु. 350/25,24,353/4, (कातन्त्रव्याकरणे, पृष्ठा-106)

[71]. अष्टा. 1/4/55

[72]. का. व्या. 2/4/15

[73]. वा. प. 3/7/125

[74]. अष्टा. 2/3/23

[75]. सि. कौ.(कारकप्रकरण, पृष्ठा-249)

"आ काडारादेका संज्ञा, विप्रतिषेधे परं कार्यम्"[76]। अत्र ज्ञातव्यम् यत् लाघवार्थम् अपि च प्रसिद्धार्थं कातन्त्रव्याकरणे करणसंज्ञा व्याख्याता नास्तीति।

पानिणि तस्य अष्टाध्यायी इति ग्रन्थे प्रथमविभक्त्याः चतुर्षु अर्थेषु प्रयुज्यते। यथा- प्रातिपदिकार्थमात्रे, लिङ्गमात्राध्यिक्ये, परिमानमात्रे, वतनमात्रे च। "प्रापदिकीर्थलिङ्गपरिमानवचनमात्रे प्रथमा"[77]। अन्यस्मिन् दिशि कातन्त्रकारेण शर्ववर्मणा लिङ्गार्थे संख्यार्थे वा प्रथमाविभक्तिः क्रियते। शेषार्थः व्याख्यावलेन गृह्यते, अतः व्याख्याकारेण स्वस्यावश्यकता सिद्धिर्भवति। पाणिनीयव्याख्याकाराणां मतानुसाराणां अलिङ्गः तथा नियतलिङ्गयुक्तशव्दः प्रातिपदिकार्थः इति पदात् स्वीकुर्वन्ति। तद्यथा- उच्चैः,नीचैः, श्रीः, कृष्णः, ज्ञानम्। लिङ्गमात्राध्यिक्यस्य उदाहरणं भवति अनियतलिङ्गयुक्तं शब्दम्। यथा- तटः, तटी, तटम्। परिमानमात्रस्य उदाहरणम्- द्रोणो ब्रीहिः, इति। अत्र शर्ववर्मा सर्वं लिङ्गार्थमेव स्वीकृतम्।

**उपसंहृतिः**

संस्कृतव्याकरणजगति कातन्त्रव्याकरणम् अतीव परिचितग्रन्थोऽस्ति। कातन्त्रव्याकरणस्य न केवलं भारतवर्षे अपि तुबहिर्देशेऽपि शास्त्रस्यास्य चर्चा प्रचलिता। अतीव सारल्येन प्रणीतमिदंकातन्त्रव्याकरणमिति। तस्माद्धेतोः सर्वेषां कृते ग्रन्थोऽयं उपकारको भवति। व्याकरणस्यास्य बहूनि अभिधानानि प्राप्यन्ते अस्माभिः। यद्यपि कातन्त्रव्याकरणम् बहुशः प्रचलितमस्ति, तथापि तत्र पाणिनीव्याकरणेन सह सादृश्यं वैसादृश्यञ्च दृश्यते। कुत्रापि समानता दृश्यते, कुत्रापि च नवीनता। अर्थात् पाणिनीयव्याकरणे यन्न दृश्यतेतत्तु क्वचिद्दृश्यते कातन्त्रव्याकरणे। अतः कातन्त्रव्याकरणं पाणिनीव्याकरणात् भिन्नम् एव वर्तते।

**सहायकग्रन्थपञ्जी**


1. अष्टाध्यायी- पाणिनि, ड. श्री गोपाल शास्त्री(सम्पा.), प्रो. गोपालदत्त पाण्डेय, चौखम्वा सुरभारती प्रकाशन, वाराणसी, २०१७
2. कातन्त्रव्याकरणम्- शर्ववर्म, विद्यावाचस्पति प्रो. हरिनारायन तिवारी (हिन्दि व्याख्याकारः एवं सम्पादकः), चौखम्वा कृष्णदास अकादमी, वाराणसी, २०१६
3. कातन्त्रव्याकरणम् (प्रथमभागः)- शर्ववर्म, ड. जानकिप्रसादद्विवेदः(सम्पा.), सम्पुर्णानन्दस्स्कृतविश्वविद्यालय, वाराणसी, २०१७
4. कातन्त्रव्याकरणम् (द्वितीयभागः)- शर्ववर्म, ड. जानकिप्रसादद्विवेदः(सम्पा.), सम्पुर्णानन्दस्स्कृतविश्वविद्यालय, वाराणसी, २०१७
5. लघुसिद्धान्तकौमुदी- वरदराज, अध्यापक ड. तपनशङ्कर भट्टाचार्य(सम्पा.), संस्कृत वुक डिपो, कलकाता, २०१२
6. मुग्धवोध-व्याकरणम्- वोपदेव, जीवनान्द बिद्यासागर(सम्पा.), चौखम्भा बिद्याभवन, वाराणसी
7. वैयाकरणसिद्धान्तकौमुदी (प्रथम भाग)- भट्टोजिदीक्षित, श्रीधरमुखोल्लसिनी (हिन्दिव्याख्यासमन्विता), आचार्य श्री गोविन्द (व्याख्याकार), शर्मा लक्ष्मी (सम्पा.), चौखम्वा सुरभारती प्रकाशन, वाराणसी, २०१८
8. वैयाकरणसिद्धान्तकौमुदी- भट्टोजिदीक्षित, (बालमनोरमा-तत्त्वबोधिनीसहिता, तृतीयभाग)- श्रीमद्गिरिधर शर्मा, श्रीपरमेश्वरानन्द शर्मा (सम्पा.), मतीलाल बनारसीदास, दिल्ली, ?
9. वैयाकरणसिद्धान्तकौमुदी (षष्ठ भाग)- भट्टोजिदीक्षित, श्रीधरमुखोल्लसिनी (हिन्दिव्याख्यासमन्विता), आचार्य श्री गोविन्द (व्याख्याकार), शर्मा लक्ष्मी (सम्पा.), चौखम्वा सुरभारती प्रकाशन, वाराणसी, २०१८
10. सिद्धान्तकौमुदी (कारक प्रकरणम्)- भट्टोजिदीक्षित, ड. सच्चिदानन्द मुखोपाध्याय(सम्पा.), साहित्य निकेतन, कलकाता, २०१५
11. सिद्धान्तकौमुदी (तत्त्ववोधिनीटीका)- भट्टोजिदीक्षित, जयकृष्ण मिश्र भैरव(सम्पा.), संस्कृत पुस्तक भाण्डार, १९५९


[76]. अष्टा. 1/4/1,2

[77]. अष्टा. 2/3/46